2 Bhandarkar wants to read उच्छिन्द्यात् or some such word after वा.

3 Bhandarkar suggests the correction भगवान्दण्डः स. Here is half of a stanza in the Āryā or Gīti metre.

4 From the facsimile in *Corp. Ins. Ind.*, III.

5 Read शुक्लैकादश्यां. Fleet reads a stop after म्.

6 The mark of punctuation is unnecessary. The word अनुध्यात is usually taken to mean "meditating on..." But in many cases it certainly means "favoured." See the Tālagunda inscription (*infra*); also my note in *J.A.H.R.S.*, X, 1937, p. 229; *Suc. Sāt.*, 1939, p. 239.

7 There is space for two letters of which the latter may be ड्ड according to Fleet. May the name be सोड्डल ?

No. 2

Language : Sanskrit.
Script : Brāhmī of the Northern Class.
Metre : Verses 1-5, अनुष्टुभ् (श्लोक).

TEXT[1]

सिद्धम् [॥*][2]

1 यद[']तज्ज्योतिरर्कोभमुर्व्व्यां[म्भा][3] * * ⌣ — ⌣ * [।*]
* * * * ⌣ — व्यापि **चन्द्रगुप्ताख्यमद्भुतम्** [॥*] [१]

2 विक्रमावकयकीता दास्य-न्यग्भूत-पार्त्थिव[।] [।*]
* * * [स]न[4]-संरक्ता धर्म्म * * ⌣ — ⌣ * [॥*] [२]

3 तस्य राजाधिराजर्षेरचि[न्त्यो][ज्ज्वल-क*][र्म्म]णः [।*]
अन्वय-प्राप्त-साचिव्यो व्या[पृत-सन्धि-वि*]ग्रह[ः] [॥*] ३

4 कौत्सइशाव इति ख्यातो **वीरसेनः** कुलाख्यया [।*]
शब्दार्थ-न्याय-लोकज्ञ×कवि≍**पाटलीपुत्रकः** [॥*] ४

5 कृत्स्न-पृथ्वी-जयार्त्थेन[5] राज्ञैवेह सहागतः [।*]
भक्त्या भगवतश्शम्भोर्ग्गुहामेतामकारयत् [॥*] ५

---

1 From the facsimile in *Corp. Ins. Ind.*, III.

2 In the left margin on the level of l. 3.

3 The lacunae may be conjecturally filled up as

°मुर्व्वीं भाति निरन्तरम् ।
दिवा-विभावरी-व्याप्ति° ॥

4 For स, Fleet reads मा; but the *ā*-sign is not clear and the *akshara* may be read as a partially preserved स. The lacunae may be conjecturally filled up as यस्य शासन-संरक्ता धर्मज्ञस्य वसुन्धरा.

5 Chandra Gupta II was a *digvijayin*. This claim apparently refers to his expedition against the Sakas of western India.

No. 12—Sāñchī Stone Inscription of Chandra Gupta II—Gupta year 93 (=A.D. 412).

SĀÑCHĪ, Bhopāl State, Central India.

FLEET, *Corp. Ins. Ind.*, III, p. 31 f; BHANDARKAR, List, No. 1262 (for other references).

Language : Sanskrit.

Script : Brāhmī of the Southern Class.

TEXT[1]

[सिद्धम् ॥*][2]

1 का[कना*]दबोट-श्रीमहाविहारे[3] शील-समाधि-प्रज्ञा-[4]गुण-भावितेन्द्रियाय परम-पुरुष-

2 चे[ल][ग*]ताय[5] चतुर्दिग्भ्यागताय श्रमण-पुङ्गवावसथायार्य्य-सङ्घाय महाराजाधि-

3 रा[ज-श्री]चन्द्रगुप्त-पाद-प्रसादाप्यायित-जीवित-साधनः अनुजीवि-सत्पुरुष-सद्भाव-

4 व्[त्यर्थं *] जगति प्रख्यापयन् अनेक-समरावाप्त-विजय-यशस्पताकः सुकुलिदेश-न

5 ष्टी * * * वास्तव्य उन्दान-पुत्राम्रकार्दवो मज-शरभङ्गाम्ररात-राजकुल-मूल्य-की-

6 त[म] * * * * ईश्वरवासकं पञ्च-मण्डल्या[*] प्रणिपत्य ददाति पञ्चविंशतिञ्च[6] दीना-

7 रान् [॥*] * * * * * * * [7]यादद्भेन महाराजाधिराज-श्रीचन्द्रगुप्तस्य देवराज इति प्रि-

---

1 From the facsimile in *Corp. Ins. Ind.*, III.

2 Above the beginning of line 1.

3 Kākanādaboṭa was apparently the old name of the Sāñchī region.

4 Originally व was engraved instead of प.

5 Fleet reads कु...ताय ; but the first *akshara* is clearly चे and traces of ल still remain.

6 Read विंशतिञ्च.

7 Fleet: त[द्]त्त.....Pañchamaṇḍalī is supposed to be the mod. Pañchāyet, the village jury of five (or more) persons. राजकुल=(a person belonging to) the royal family; cf. mod. Rāwal. It seems that half of the money and the price of the *vāsaka* (house-site?) was paid by Āmrakārdava and the other half by his friends.

8 य-ना[म्नः*][1] * * * * * रितस्य सर्व्व-गुण-संपत्तये यावच्चन्द्रादित्यौ तावत्पञ्च भिक्षवो भुंज-

9 तां र[ङ्ग*]-गृ[हे*] [च*] [दी*][प]को ज्वलतु [।*] मम चापरार्द्धात्पञ्च वै भिक्षवो भुंजतां रङ्ग-गृहे च

10 दीपक इ[ति] [॥*] [त]देतत्प्रवृत्तं य उच्छिन्द्यात्स गो-ब्रह्म-हत्यया संयुक्तो भवे-त्पञ्चभिश्चान-[2]

11 न्तर्य्यैरिति [॥*] सं ९० (+*) ३ भाद्रपद-दि ४ [॥*]

No. 13—Inscription on Some Silver Coins of Chandra Gupta II—Gupta year 90+x (=490-10+x)

ALLAN, *Catalogue*, p. 49 ff., No. 133 ff.

First Side[3]

Bust of king Chandra Gupta to right with traces of Greek letters[4]; on left:—

व ६० (+*) [x][5] (=[गुप्त]-वर्षे ६०+x)

---

1 Fleet fills up the lacuna by प्रियनामामात्यो भवत्येतस्य, and takes देवराज to be the name of an officer of Chandra Gupta II. देवराज or देवगुप्त was however another name of this king. The grants of Vākāṭaka Pravarasena II mentions Chandra Gupta II, his maternal grandfather, as देवगुप्त.

2 The पञ्चानन्तर्य्यकर्म or ०धर्म are the five sins that bring with them immediate retribution. They are five of the six *abhiṭhānas* (*supra*, p. 73), viz. *mātughāto* (matricide), *pitughāto* (parricide), *arahantaghāto* (killing an Arhat), *lohituppādo* (shedding the blood of a Buddha), *saṅghabhedo* (causing divisions among the priesthood), *aññasatthuddeso* (following other teachers)—with the exception of the last or the last but one.

3 From representation in Allan's Catalogue, Plate X, No. 15.

4 The silver issues of Chandra Gupta II were meant for circulation in Western India conquered from the Saka Satraps. The introduction of the king's bust, traces of Greek characters and the date are all due to the influence of the Satrapal coins.

5 There is a small sign after the figure for 90. We cannot be definite regarding its value. The date shows that western India was conquered before 409-10+x A.D. Cf. *supra*, p. 182, n. 2, and the provenance of *supra*, Nos. 3 and 10-11.

Second Side

Garuḍa, standing, facing, with outspread wings; border of dots; above on right cluster of dots; inscription in Brāhmī characters :—

परमभाग[व*]त-महाराजाधिराज-श्रीचन्द्रगुप्त- विक्रमादित्य[:*][1]

No. 14—Meharaulī Iron Pillar Inscription of Chandra[2]

MEHARAULĪ or Memharaulī, near Dehli

FLEET, *Corp. Ins. Ind.*, III, p. 141; BHANDARKAR, List, No. 1243 (for earlier references); *J. A. H. R. S.*, X, p. 86ff; D. C. SIRCAR, *J. R. A. S. B. L.*, v, p. 407ff.

Language : Sanskrit.

Script : Brāhmī of the Northern class of the 5th century A. D[3].

Metre : Verses 1-3 शार्दूलविक्रीडित.

---

1 The vowel-marks, etc., are not clear on the plate. On another variety of these coins we have the legend :—श्री-गुप्त-कुलस्य महाराजाधिराज-श्रीचन्द्रगुप्त-विक्रमाङ्कस्य.

2 He should probably be identified with Chandra Gupta II. The facts (1) that his name was Chandra (cf. the name on the copper coins of Chandra Gupta II), (2) that he went on a *digvijaya* (cf. *supra*, No. 11, l. 5), (3) that he was lord of an empire (cf. l. 5.), (4) that the Delhi region formed part of his kingdom, and (5) that he was a Vaishṇava, suggest a monarch like Chandra Gupta II. His identification with Chandragupta I, the Nāga Chandrāṃśa, or Chandravarman of Mālwā or of the Susuniyā record, etc., is less convincing. The identification with Maurya Chandragupta is absurd.

3 As has been pointed out by Fleet, allowing for "the stiffness resulting from engraving" on iron, the characters approximate in many respects the Allahābād inscription (*supra*, No. 1), supposed by that scholar to be later than Samudragupta; but with the "very marked *mātrās* or horizontal top-strokes", the letters resemble most closely those used in the Bilsaḍ inscription of Kumāra Gupta (No. 15, *infra*). The record must therefore be assigned to the 5th century. Prinsep placed it in the 3rd or 4th century and Bhau Daji in the post-Gupta period.

TEXT[1]

1 य[स्यो]द्वर्त्तयतः प्रतीपमु[र]सा शत्रून्समेत्यागता-
न्वङ्गेष्वाहव-वर्त्तिनो(ऽ॰)भिलिखिता खड्गेन कीर्त्ति[र्भु]जे [।*]

2 तीर्त्वा सप्त **मुखानि**[2] येन [स]म[रे] **सिन्धो**र्ज्जिता [व]**ाह्लिका**[3]
यस्याद्याप्यधिवास्यते **जलनिधि**र्व्वीर्य्यानिलैर्द्दक्षिणः [॥*] **1**[4]

3 [खि]न्नस्येव विसृज्य गां नरपतेर्ग्गामाश्रितस्येतरां
मूर्त्या[5] कर्म्म-जितावनिं[6] गतवतः कीर्त्या[7] स्थितस्य क्षितौ [।*]

---

1 From the facsimile in *Corp. Ins. Ind.*, III. This pillar was brought here from some hill near the Beas by some energetic ruler of Delhi (Smith, *E. Hist. Ind.*, p. 401). Cf. Aśoka's pillars transferrred to Delhi by Ferūz Shāh (*supra*, p. 55, n. 1).

2 For the seven mouths of the Indus, see *Periplus*, § 38, and Ptolemy's *Geog.*, VII, i, § 2.

3 Bhau Daji reads वाल्हिका. The right arm of the triangle of व is not preserved. ह्लि is however quite clear. Bhandarkar places this Vālhika (=Balkh) on the Vipāśā (Beas) on the strength of the *Rāmāyaṇa* verse quoted at p. 277 n. 5, *infra*. There however the reading वाह्लिकान् is certainly a mistake for वाहिकान् or वाही॰. For the well-known Vāhīka country (=the Panjāb) on the Beas and other rivers, cf. पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तरा स्थिताः। तान्धर्म्मबाह्यानशुचीन्वाह्लीकानपि वर्जयेत् ॥ .....वह्लिश्चनाम ह्लीकश्च विपाशायां पिशाचकौ। तयोरपत्यं वाह्लीका नैषा सृष्टिः प्रजापतेः ॥ *Mbh.*, VIII, 44, vv. 7 and 41; also see *P. V. Kane Volume*, Poona, Art. No. 64.

4 The verse simply refers to the four limits of the territory claimed to have been traversed by the king in course of his *digvijaya*. The eastern limit was वङ्ग; the southern limit दक्षिण-जलनिधि; the western limit मुखानि सिन्धोः and the northern limit वाह्लिक. The conventional claim is on a par with that of later kings, *e.g.*, Yaśodharman who boasts of conquering the whole country to the west of the लौहित्य, to the south of the तुहिन-शिखरिन्, to the east of the पश्चिमपयोधि and to the north of the महेन्द्र (cf. Mahendrāchala in the Tinnevelly Dist.). It is a प्रशस्ति which may have germs of truth, but may not be entirely historical.

5 Read मूर्त्या.

6 Read जितावनि which is the reading of Fleet. 7 Read कीर्त्या.

4 शान्तस्येव महावने हुतभुजो यस्य प्रतापो महा-
त्राद्याप्युत्सृजति प्रणाशित-रिपोर्य्यन्नस्य शेषः क्षितिम् [॥*] 2[1]

5 प्राप्तेन स्व-भुजार्ज्जितञ्च सुचिरञ्चैकाधिराज्यं क्षितौ
चन्द्राह्वेन समग्र-चन्द्र-[स]दृशीं वक्त्र-श्रियं बिभ्रता [।*]

6 तेनायं प्रणिधाय[2] भूमि-पतिना भावेन[3] **विष्णो**[4] मतिं
प्रान्शुर्व्विष्णुपदे[5] गिरौ भगवतो **विष्णोर्ध्वजः** स्थापितः [॥*] 3

---

1 Bhandarkar thinks that the king was not dead but alive when the eulogy was engraved, though he was no longer ruling. The natural interpretation of the verse however suggests that the pillar is posthumous. Cf. खिन्नस्य (=अविजित-देशाभावात् क्षुब्धस्य) इव (उत्प्रेक्षायां) गां (=इहलोकं) विसृज्य (=परित्यज्य) [नवदेशान् जेतुम्] इतरां गां(=लोकान्तरं) आश्रितस्य ; मूर्त्या (=देहेन) कर्मजितावनिं (=सुकृतार्जितस्वर्गलोकं) गतवतः, [परं] कीर्त्या क्षितौ स्थितस्य [च] नरपतेः (=यद्यपि शरीरम् इहलोकं त्यक्तवत्, तथापि कीर्त्तिः इह एव तिष्ठति यस्य राज्ञः) ; शान्तस्य (=निर्वाणस्य अपि अविगत-तापस्य), etc. If our identification is correct, the pillar was erected by Chandra Gupta II about the end of his life, but the record was engraved by Kumāra Gupta I soon after his father's death.

2 There are traces of an incomplete धा after धा in the original.

3 Fleet reads धावेन. The first *akshara* with *serif* is भा of which however the left slanting stroke has been joined with the right vertical arm. It may pass as a form of व, but never as ध which is without serif. It may be tempting to suggest the correction देवेन referring the name to Chandra Gupta II Deva Gupta.

4 Read विष्णौ.

5 Read प्रांशु°. This Vishnupada hill is not far from the Kurukshetra and the Beas. Cf. गत्वा हि श्रद्धया युक्तः कुरुक्षेत्रं कुरूद्वहः ।...ततो गच्छेत धर्मज्ञो विष्णोः स्थानमनुत्तमम् । etc.(*Mbh.*, III, 73, 8ff. ; also 103ff.); एतद्विष्णुपदं नाम दृश्यते तीर्थमुत्तमम् । एषा नदी विपाशा च नदी परमपावनी ॥ (*Ibid.*, III, 138, 8); ययुर्मध्येन वाहीकान् (sic. वाहीकान्) सुदामानञ्च पर्वतम् ॥ विष्णोः पदं प्रेक्षमाणा विपाशां चापि शाल्मलीम् । (*Rām.*, II, 68, 18-19.)

No. 15—Bilsad Stone Pillar Inscription of Kumāra Gupta I (c. 414-55 A.D.)

—Gupta year 96 (=A.D. 415-16).

Bilsad or Bilsand Eṭā (Etah) Dist., U. P.

Fleet, *Corp. Ins. Ind.*, III, p. 43f; Bhandarkar, List, No. 1263 (for other references).

Language : Sanskrit influenced by Prakrit.

Script : Brāhmī of the Northern Class.

Metres : Verses 1-2 उपगीति (defective, with यतिभङ्ग-दोष in V. 1); V. 3 स्रग्धरा ; V. 4 शार्दूलविक्रीडित.

TEXT[1]

1 [सिद्धम् ॥*] [सर्व्व-राजोच्छेत्तुः पृथिव्यामप्रतिरथस्य चतुरुदधि-स*][लिला]-स्वादित-यशसो

2 [धनद-वरुणेन्द्रान्तक-समस्य कृतान्त-परशोः न्यायागतानेकगो-हि*]रण्यकोटि-प्रदस्य चिरोत्सन्नाश्वमेधाहर्त्तुः

3 [महाराज-श्रीगुप्त-प्रपौत्रस्य महाराज-श्रीघटोत्कच-पौत्रस्य॰ म*][हा]राजाधिराज-श्रीचन्द्रगुप्त-पुत्रस्य

4 लिच्छ[वि-दौहित्रस्य*] [महादेव्यां कुमारदेव्यामुत्पन्नस्य महाराजा*]धिराज-श्रीसमुद्रगुप्त-पुत्रस्य[3]

5 महादेव्यां दत्त[देव्यामुत्पन्नस्य] [स्वयमप्रतिरथस्य*] [परम*]-भागवतस्य महा-राजाधिराज-श्रीचन्द्रगुप्त-पुत्रस्य[3]

---

1 From the facsimile in *Corp. Ins. Ind.*, III.

2 The illegible portion in ll. 1-3 can be restored from passages in the Allahābād pillar inscription of Samudragupta and the Bhitarī pillar inscription of Skandagupta.

3 For the *sāpekṣa-samāsas* here (properly समुद्रगुप्तस्य पुत्रस्य) and in l. 5 (properly चन्द्रगुप्तस्य पुत्रस्य), see *supra*, p. 175, n. 6 and the Garhā ins., p. 179.

6 महादेव्यां ध्रुवदेव्यामुत्पन्नस्य महाराजाधिराज-श्रीकुमारगुप्तस्याभि[व]र्द्धमान-
विजय-राज्य-संवत्सरे षण्णवते[1]

7 [अस्यान्दि]वस-पूर्व्वायां[2] भगवतस्त्रैलोक्य-तेजस्संभार-संतताद्भुत-मूर्त्तेर्ब्रह्मण्यदेवस्य

8 * * * * निवासिनः स्वामि-महासेनस्यायतने-
[ऽ*]स्मिन्कार्त्तयुगाचार-सद्धर्म्म-वर्त्मानुयायिना [॥*] 1

9 [माता][3] * * * * * * [प]र्षदा [।*]
मानितेन ध्रुवशर्म्मणा कर्म्म महत्कृतेदम्[4] । [।*] 2

10 कृ[त्व]ा [नेत्र*]ाभिरामां मु[नि-वसति][मिह*] [स्व]र्ग[5]-सोपान-[रू]पां ।[6]
कौबेरच्छन्दबिम्बां स्फटिकमणिदलाभास-गौरां प्रतोलीम् ।[7]

11 प्रासादाग्राभिरूपं गुणवर-भवनं [धर्म्म-स*]त्र[8] यथावत् ।
पुण्येष्वेवाभिरामं व्रजति शुभमतिस्तात-शर्म्मा ध्रुवो(ऽ*)स्तु[9] ।[।*] 3

12 — । — । — स्य ⌣ — शुभामृतवर-प्रख्यात-ल[ब्धा भुवि] ।[10]
— — भक्तिरहीन-सत्व-समता[11] कस्तं न संपूजयेत् ।

13 [येनापूर्व्व*]-विभूति-सञ्चय-चयैः शैली— ⌣ — — ⌣ — : ।
तेनायं ध्रुवशर्म्मणा स्थिर-वरस्तम्भो[च्छ्र]यः कारितः ।[।*] 4

---

1 Read षण्णवतितमे. राज्यसंवत्सर=regnal year; but when eras came into use, the same expression was technically used also with some year of an era (which took the place of the regnal year) just to indicate that the particular year of the era falls in the reign-period of the king. When both of them are mentioned, sometimes a distinction is made between the regnal year and the year of an era (cf *supra*, No. 9).

2 See *supra*, p. 133, n. 1; p. 121, etc. पूर्वा=what has been given above; the date indicated above; cf. मालव-पूर्वा in one record.

3 The lacuna may be filled up as मातापित्रोरात्मनश्च पुण्यार्थं साधु-पर्षदा. Read संमानितेन for the sake of the metre. 4 Read कृतमिदं.

5 The letters are indistinct in the first half of l. 10.

6 The mark of punctuation is unnecessary. कौबेरच्छन्द is a kind of pearl necklace.

7 Properly गौरीं. प्रतोली="street, main road of a city", according to lexicons. Here the meaning appears to be "a gateway, a gateway with a flight of steps".

8 The restoration is due to Fleet.

9 "May the venerable Sarmā endure for a long time". Here the second part of the name (शर्मा) represents the whole name (ध्रुवशर्मा). See *supra*, p. 261, n. 3. There is a play on the word ध्रुव.

10 The mark of punctuation is superfluous. 11 Usually सत्त्व.

No. 16—Dhānāidaha Copper-plate Inscription [of Kumāra Gupta I]—Gupta year 113 (=A.D. 432-33)

DHĀNĀIDAHA, Rājshāhī Dist., Bengal

R. D. BANERJI, *J. A. S. B.*, V, p. 459 ff; R. G. BASAK, *Ep. Ind*, XVII, 347 f; BHANDARKAR, List, No. 1267 (for other references).

Language : Sanskrit

Script : Brāhmī of the Northern class.

Metre : Verses 1-3 अनुष्टुभ् (श्लोक).

TEXT[1]

1 .....[स*]म्वत्सर-श[ते] [2]त्रयोदशोत्त[रे*]

2 [१००+१०+३*]..... [अस्या*][न्दि]वस-पूर्व्वायां परमदैवत-पर-

3 [म-भट्टारक-महाराजाधिराज-**श्रीकुमारगुप्तः** *]..... कुटु[म्बि][4].....ब्राह्मण-शिवशर्म्म-नागशर्म्म-मह-

4 .....वकीर्त्ति-क्षेमदत्त[5]-गोप्तृक-वग्गपाल-पिङ्गल-शुङ्क-काल-

5 .....विष्णु-[देव]शर्म्म-विष्णुभद्र[6]-खासक-रामक-गोपाल-

---

1 From the facsimile (not quite serviceable) in *Ep. Ind.*, XVII. The record is fragmentary. Lines 15-16 show that each complete line of the epigraph contained some 40 *aksharas*. This is the right half of the original record containing about 22 *aksharas* in a line. But ll. 1-5 and 16-17 are further damaged. According to Banerji, the fragments of the upper left corner which was broken in the exhibition ground of 1906-07 contained the two *aksharas* म and र which are evidently the second and third syllables of Kumāragupta's name. Nos. 16, 18, 19, etc. are essentially sale-deeds and not records of free gift. They record semi-gifts, the state land being sold at a reduced rate to Brāhmaṇas, etc. who purchase it with religious motives.

2 Read संवत्सर. Some 28 *aksharas* are lost, but may be conjecturally restored as १[०] चतुरुदधि-सलिलास्वादितयशसो महाराजाधिराज-श्री-कुमारगुप्तस्य संवत्सर०.

3 Here followed the names of the month and the tithi (cf. *infra*, No. 17, ll.3-4).

4 The reading was possibly समवेतान्कुटुम्बिनः ग्रामिक-ब्राह्मण०.

5 Banerji : क्षमवन्त. 6 Banerji : विष्यभद्र.

6 .....श्रीभद्र-सोमपाल-रामाशक(?)-ग्रामाष्टकुलाधिकरणञ्च[1]

7 .....विष्णुना(?णा) विज्ञापिता इह **खादा(टा?)पार**[2]-विषये(ऽ*)नुवृत्त-मर्य्यादास्थि[ति]-

8 ...नीवीधर्म्म-च्च(क्रू?)येण[3] लभ्य[ते] [।*] [त]दर्हथ ममाद्यानेनैव[4] क्रमेन(?ण) दा[तुं]

9 .....समेत्या(?)भिहितै(:*) सर्व्वमेव * * कर[5]-प्रतिवेशि(?)-कुटुम्बिभिरवस्थाप्य क-

10 ..... * रि * कन * यदितो * * [त]दवगतमिति यतस्तथेति प्रतिपाद्य

11 .....[अष्टक-न*]वक-नला[भ्या]मपविच्छद्य क्षेत्र-कुल्यवापमेकं[6] दत्तं [।*] ततः आयुक्तक-

12 ..... * **भ्रा(?)तृकटक**-वास्तव्य-छन्दोग-ब्राह्मण-वराहस्वामिनो दत्तं [।*] त[द्भव]-[7]

13 .....भूम्या दा[नाद्ये]पे च गुणागुणमनुचिन्त्य शरीर-क[।*]म्पनकस्य चि-

14 [र-चञ्चलत्वं*]..... [॥*] [उ]क्तञ्च भगवता द्वैपायनेन [।*]

स्वदत्ताम्परदत्ताम्वा[8]

15 [यो हरेत वसुन्धरां ।*]

[स विष्ठायां कृमिर्भूत्वा पितृ*]भिः सह पच्यते [॥*] **1**

षष्टिं वर्ष-सहस्राणि[9] स्वर्गे मोदति [भू]मिदः [।*]

16 [आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥*] **2**

---

1 **अष्टकुल**, like पञ्चमण्डली (mod. पञ्चायेत्) of *supra*, No. 12, may indicate the village jury. **अधिकरण**=court of justice and office of administration=governing body. The passage thus seems to mean "the local governing body of the village" **अष्टकुल**=eight families=representatives of eight (or more) families.

2 Banerji : **महाखुपापार**. 3 Or **धर्म्मात्क्रयेण** ?.

4 **मम**=**मह्यं**. 5 **कारु** or **आज्ञाकर** ?.

6 **कुल्यवाप** (lit. area on which one *kulya* of seed can be sown) may be related to Old Beng. *kuṛobā*=mod. *bighā* (100 square cubits). But it appears to be a much larger area. The word may also be connected with **कुल**, for which see **मनु**, VII, 119. According to Kullūka, **कुल** means land annually ploughable by two ploughs (*halas*). Medhātithi says that it is called **हट्ट** in some places and **उट्ट** in others. See *infra*, p. 286, n. 9, and No. 42, n. **अपविच्छद्य**=severing=measuring out.

7 Possibly we have to restore **भवद्भिः सर्वैरेवानुमोद्यानुपालनीयं**. ◦**स्वामिनो**=**स्वामिने**

8 Read **दत्तां वा**. 9 Read ◦**स्वाणि**

[पृ*]र्व्वदत्तां द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर [।*]

महीं [मही][मताञ्छ्रेय*]

17 [दानाच्छ्रे योऽनुपालनं ॥*] 3

.....यं...भद्रे न उत्कीर्णा स्तम्भेश्वरदासे[न][2] [॥*]

No- 17—Karamdaṇḍa Stone Linga Inscription of the time of Kumāra Gupta I

—Gupta year 117 (=436 A.D.)

Bharādhī Dīh, near KARAMDAṆḌĀ, Faizābād Dist., U. P.

STEN KONOW, *Ep. Ind.*, X, p. 71 f ; BHANDARKAR, List, No. 1270 (for other references).

Language : Sanskrit.

Script : Brāhmī of the Northern class[3].

TEXT[3]

1 नमो **महादेवाय** । म[हाराजाधिराज-श्री][**चन्द्रगुप्त**-पादा*]-

2 नुध्यातस्य चतुधुदधि[4]-सलिलास्वादित-य[शसो] [महाराजा*]-

3 धिराज-श्री**कुमारगुप्तस्य** विजयराज्य- **संवत्स[र]-शते सप्तदशोत्त[रे*]**

4 कार्त्तिक-मास-दशम-दिवसे(ऽ*)स्यान्दिवस-पूर्व्वायां [च्छान्दोग्याचार्य्यांश्च]वाजि-

5 सगोत्र-कुरम[।]र[व्या?]भट्टस्य पुत्रो विष्णुपालितभट्टस्तस्य पूत्रो[5] मह[।]र[।]-

6 जधिजाजा[6]-श्री**चन्द्रगुप्तस्य** मन्त्री कुमारामात्यशिशखरस्वाम्यभूत्तस्य पुत्रः

---

1 The reading intended may be [लिखिता पट्टिके]यं अमात्य-भद्रे ण उत्कीर्णा स्तम्भेश्वरदासेन. Traces of क before यं are visible. Basak reads सु(?)श्रीभद्रेन(ण).

2 Banerji reads स्थङ्गेश्वर,

3 From the facsimile in *Ep. Ind.*, X. The script is described as the so-called western veriety of the Gupta alphabet. The eastern variety is determined by the letters म (without a curve in the left side), स (with a loop instead of the left curve) and ह (with the horizontal base absent and the lower part curved to left). I have not adopted the nomenclature as the forms are actually pre-Gupta and as they are sometimes used indiscriminately with the alternate forms.

4 Read चतुरुदधि. 5 Read पुत्रो. 6 Read °जाधिराज.

7 पृथिवीपेणो महाराजाधिराज-श्रीकुमारगुप्तस्य मन्त्री कुमारामात्यो(ऽ*)न-

8 न्तरं च महाबलाधिकृतः[1] भगवतो महादेवस्य पृथिवीश्वर[2] इत्येवं समाख्यातस्या-

9 स्यैव भगवतो यथा-कर्त्तव्य-धार्म्मिक-कर्म्मणा पाद-शुश्रूषणाय भगवच्छै-

10 लेश्वरस्वामि-महादेव-पादमूले आयोध्यक-नानागोत्रचरण-तपः-

11 स्वाध्याय-मन्त्र-सूत्र-भाष्य-प्रवचन-पारग-भारडिदसमद[3]-देवद्रोण्यां

12 ... ...

No. 18—Dāmodarpur Copper-plate Inscription of the time of Kumāra Gupta I

—Gupta year 124 (=444 A.D.)

DĀMODARPUR, Dināj̇pur Dist., Bengal.

R. G. BASAK, *Ep. Ind.*, XV, p. 130 f.

Language : Sanskrit.

Script : Brāhmī of the Northern class.

Metre : Verse 1 अनुष्टुभ् (श्लोक).

TEXT[4]

First Side

1 सम्व[5] १०० (+*) २० (+*) ४ फाल्गुण-दि[6] ७ परमदैवत-परमभट्टारक-महाराज[ा*]-

2 धिराज-श्रीकुमारगुप्ते पृथिवी-पतौ तत्पाद-परिगृहीते पुण्ड्रवर्द्ध[न*]-

---

1 See *supra*, p. 260, n. 1; p. 264, n. 7. Cf. अन्वय-प्राप्त-साचिव्य in *supra*, No. 11, l. 3.

2 The Liṅga was apparently named after Pṛithivīsheṇa.

3 The lower portions of the *aksharas* of l. 11 are broken away, and भारडि-दसमद is doubtful. Konow thinks that there is reference to the village Bhāraḍi (Bhāraḍida?) and that समद may be समुद्र, an epithet of Śiva. But there must be the name of a Brāhmaṇa. देवद्रोणी = a procession with idols.

4 From the facsimile (not quite serviceable) in *Ep. Ind.*, XV.

5 Read संव which is a contraction of संवत्सरः or संवत्सरे.

6 Read फाल्गुन. दि stands for दिवसः or दिवसे.

3 भुक्तादुपरिक[1]-**चिरातदत्तेनानु**वलवानक[2]-**कोटिवर्ष**-विषये च त-

4 न्नियुक्तक[3]-कुमारामात्य-वेत्रवर्मन्यधिष्ठाणाधिकरणञ्च[4] नगरश्रेष्ठि-

5 धृतिपाल-सार्थवाहवन्धुमित्र[5]-प्रथमकुलिकधृतिमित्र-प्रथमका[य*]-

6 स्थशाम्बपाल-पुरोगे संव्यवहरति[6] यतः ब्राह्मण-कर्प्पटिकेण[7]

7 विज्ञापित(*) अरर्हथ[8] ममाग्निहोत्रोपयोगाय[9] अप्रदाप्रहत-खि-[10]

8 ल-क्षेत्र[*] त्तदीनारिक्य-कुल्यवापेण[11] शश्वताचद्रार्क्क[12]-तारक-भोज्ये[त*]-

Second Side

9 या[13] नीवी-धर्म्मेण दातुमिति एवं दीयतामित्युत्पन्ने त्रिनो[14] दीना[राण्यु*]-

---

1 Read भुक्तावुप०. The city of Puṇḍravardhana has been identified with Mahāsthān in the Bogrā Dist. The *bhukti* or district of this name comprised the Bogrā-Rājshāhi-Dināpur region of North Bengal, though in a later period it also included parts of Eastern and Southern Bengal. The chief town of Koṭivarsha=Bāṇapura (=Bāṇanagara, mod. Bāṇgarh) =Devīkoṭa was in the present Dināpur Dist.

2 Read ०दत्ते अनुवहमानक०. उपरिक is the title of a provincial viceroy. *Infra*, No. 19 has ०दत्तस्य भोगेनानु० (ever prospering under the rule of.....)

3 Note that the governor of the *vishaya* was appointed by that of the *bhukti*.

4 Read ०वर्म्मण्यधिष्ठाना०. 5 Read बन्धु.

6 अधिष्ठान=city; अधिकरण=court and office of administration=government. Note that the governor was helped in the admistration by a Municipal or District Board of 4 members, viz., the chief guild-president, the chief merchant, the head of the artisan class and the chief of the writer class who possibly acted as secretary of the Board. Note also that Mitra is typically and Pāla, etc., are usually cognomens of the Kāyasthas of Bengal. The Kāyasthas appear to be a mixed caste with both Brāhmaṇa and non-Brāhmaṇa elements. So also are the Vaidyas. This is due to the fact that both are professional castes.

7 Read ०केन. 8 Read अर्हथ

9 *I. e.*, service in regard to the maintenance of sacred fire.

10 खिल and अप्रहत both mean "untilled" land· अप्रहत may here mean "unreclaimed jungle land". प्रदा=gift; so अप्रदा=nontransferrable (or unsettled) property. For नीवि, see *supra*, p. 147, n. 3.

11 Read तैदीनारिक्य-कुल्यवापेन. Dīnāra is the Gupta gold coin named after the Roman Denarius.

12 Read शश्वदा०. 13 Read भोग्य०. 14 Read त्रीणि.

10 पसंगृह्य यतः पुस्तपाल-रिशिदत्त[1]-जयनन्दि-विभुदत्तानामवधा-

11 रणया डोङ्गाया उत्तर-पश्चिमद्देशे[2] कुल्यवापमेकम्[3] दत्तम् [॥*]

12 स्व-दत्तां पर-दत्तां वा[4] यो हरेत वसुन्धरां [।*]

भूमि-[दान]-संबद्धा[:*] श्लोका भवन्ति [।*][5]

13 स विष्ठायां कृमिर्भूत्वा[6] पितृभि[7] सह पच्यतेति [॥*] 1

No. 19—Dāmodarpur Copper-plate Inscription of the time of Kumāra Gupta I

—Gupta year 128 (=A.D. 447).

Dāmodarpur, Dināj̃pur Dist., Bengal.

R. G. Basak, *Ep. Ind.*, XV, p. 133 f; K. N. Dikshit, *ibid*, XVII, p. 193.

Language: Sanskrit

Script: Brāhmī of the Northern class.

Metre: Verses 1-2 अनुष्टुभ् (श्लोक).

TEXT[8]

First side

1 स[˙] १०० (+*) २० (+*)८[9] वैशाख-दि १०(+*) ३ पर[मदैव]त-परमभट्टारक-महाराजाधिराज-[श्री][कुमा*]-

2 रगुप्ते पृथिवी-पतौ [तत्पाद]-परिगृहीतस्य पु[ण्ड्र]वर्द्धन-भुक्तावुप[रिक-चि]रात-दत्त[स्य]

---

1 Read ऋषिदत्त. *Pustapāla* = record-keeper. He also determined whether the land could be and should be sold to the party. See *infra*, No. 41, n.

2 Read पश्चिमोद्देशे. Doṅgā was a locality. 3 Read ०मेकं.

4 Read दत्तां वा. Properly वसुन्धराम्

5 Properly भूमिदान-संबद्धः श्लोक भवति should be read before स्वदत्तां.

6 The usual spelling is कृमि.

7 Read पितृभिः सह पच्यते ॥ इति ॥

8 From the facsimile (not quite serviceable) in *Ep. Ind.*, XV.

9 Basak: ६.

3 भोगेना[नुव]ह[मानक]-**कोटिव[र्ष]**-विषये तन्नियुक्तक-कु[मा]रामात्य-वे[त]-

4 वर्म्मणि[1] अधिष्ठाना[धिक]र[णञ्च] नगर[श्रे]ष्ठिधृतिपाल-सार्थवा[हबन्धुमि]त[2]-प्र[थ]-

5 मकुलिकधृतिमित्र-[प्रथ]मकायस्थ[शाम्ब]पाल-पुरो[गे] सम्व्यव[हर]ति[3] [यतः*] स...[4]

6 विज्ञापितं[5] अ[र्ह]थ मम प[ञ्च]-महायज्ञ-प्रवर्त्तनायानुवृत्ताप्रदाक्षयनि[वी*]-[6]

7 मर्य्यादया दातुमिति एतद्विज्ञाप्यमुपलभ्य पुस्तपा[ल]-रिसिदत्त-जयन[न्दि-वि]-[7] [भुदत्तानामव*]-

8 धारणया दीयतामित्यु[त्प]न्ने[8] एतस्माद्य[था]नुवृत्त-दैदीनारि[क्य-कु]ल्यवापे[न]

Second Side

9 [द्व]यमुप[संगृ]ह्य[9] [ऐरा]वता[गो]राज्ये पश्चिम-दिशि[10] पञ्चद्रो[णा]-

10 [म]काः[11] ह[ट्ट]-पानकैश्च[12] सहितेति[13] दत्ताः [।*] तदुत्तर-कालं सम्व्य-[14] वहारिभिः [धर्म्ममवेक्ष्या]नु[म]-

---

1 Here as well as in many other records the rules of **सन्धि** have not been observed. **सन्धि** however is optional in Sanskrit prose, though in poetry it is compulsory and its violation there is called **विसन्धि-दोष** by grammarians.

2 Read **बन्धु०**. 3 Read **संव्य०**.

4 Evidently this portion contained the name of the purchaser with the third case-ending. 5 Read **०पितमर्ह०**.

6 Read **नीवी०**. **अनुवृत्त**=customary, following the general rule. For the **पञ्च-महायज्ञ**, see **मनु**, III, 69. 7 Read **ऋषिदत्त**.

8 **उत्पन्न**=ascertained. **अवधारणा**=ascertainment, determination, affirmation. Cf. **प्रतिपाद्य** in *supra*, No. 16, l. 10. See also *infra*, No. 41, n.

9 **दीनारद्वय०** is to be understood. In that case 5 *droṇas* (=*droṇavāpas*) would be equal to ⅘ *kulyavāpa* and 7½ *droṇas*=1 *kulyavāpa*. Actually however, 8 *droṇas*=1 *kulya*; 8 *droṇavāpas*=1 *kulyavāpa*. The *droṇ* is a land measure in many parts of Bengal even today; but it varies greatly according to the length of the measuring rod which again is of different length in different parts of the country. In some parts of Bengal the *droṇ* is a little less than 7 acres. See *infra*, No. 43, n.

10 Read **पश्चिम**. 11 Read **०त्मकाः (भूमयः*)**.

12 I cannot accept the seggestion of F. W. Thomas that we should read here **अरहट्ट** and translate the passage, "with drinking places having Persian wheels." **हट्टपानकैः**=with the right of using the canals excavated for watering the field (?); see *supra*, p. 281, n. 4. 13 Read **सहिता इति**.

14 Read **संव्य०**=by the administering agents.

11 न्तव्याः[1] [।*] अपि च भूमि-दान-सम्बद्धामिमौ[2] श्लोकौ भवतः [।*]

पूर्व-दत्तां द्विजाति[भ्यो]

12 यत्नाद्रक्ष युधिष्ठिर [।*]

महीं महीवतां[3] श्रेष्ठ दानाच्छ्रेयो(ऽ*)नुपा(ल*)नं[4] [॥*] **1**

बहुभिर्व्वसुधा[5] दत्ता दी[य]ते च

13 पुनः पुनः [।*]

यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलमिति[6] [॥*] **2**

No. 20—Mankuwār Buddhist Stone Image Inscription of Kumāra Gupta I—Gupta year 129 (=448 A.D.)

MANKUWĀR, Allahābād Dist., U. P.

FLEET, *Corp. Ins. Ind.*, III, p. 46 f; BHANDARKAR, List, No. 1273 (for other references).

Language: Sanskrit influenced by Prakrit

Script: Brāhmī of the Northern class[7].

TEXT[7]

1 ॥[8] नमो बुधान[9] [।*] भगवतो[10] सम्यक्सम्बुद्धस्य स्व-मताविरुद्धस्य[11] इयं प्रतिमा प्रतिष्ठापिता भिक्षु-**बुद्धमित्रेण**[12]

---

1 अनुमन्तव्य=should be approved. 2 Read सम्बद्धावि०. 3 Read महीमतां.

4 Properly ०नम्. But often in inscriptions we find the *anusvāra* used in such cases. 5 Read बहु०.

6 Properly फलम् ॥ इति.

7 From the facsimile in *Corp. Ins. Ind.*, III. The script is the so called Eastern Gupta alphabet (*supra*, p. 282, n. 3).

8 The word सिद्धम् is expressed by as symbol.

9 Possibly Prakrit बुद्धानं is intended. Read बुद्धेभ्यः or बुद्धाय.

10 Read भगवतः.

11 *I.e.*, one who was consistent with his own teachings, who lived according to his own teachings.

12 There is no reason to identify this Buddhamitra with any particular monk of this name known from the history of Buddhism.

2 सम्वत्[1] १०० (+*)२० (+*) ९ महाराज-श्रीकुमारगुप्तस्य राज्ये ज्येष्ठमास-दि[2] १० (+*)= सर्व-दुःक्ख-प्रहानार्त्थम्[3] [॥*]

No. 21—Mandasor Stone Inscription of Kumāra Gupta I and Bandhuvarman—Mālava[4]

years 493 and 529 (=A.D. 436 and 473)

MANDASOR, Gwalior State, Central India.

FLEET, *Corp. Ins. Ind.*, III, p. 81 ff; BHANDARKAR, List, No. 6 (for other references).

Language: Sanskrit.

Script: Brāhmī of the Southern class.

Metre: Verses 1-2. शार्दूलविक्रीडित; V. 3 वसन्ततिलका; V. 4 आर्य्या; Vv. 5-6 वसन्ततिलका; Vv. 7-9 उपेन्द्रवज्रा; V. 10. उपजाति (इन्द्रवज्रा+उपेन्द्रवज्रा); V. 11 वसन्ततिलका; V. 12 उपजाति (इन्द्रवज्रा+उपेन्द्रवज्रा); V. 13 आर्य्या; V. 14 वसन्ततिलका; V. 15 द्रुतविलम्बित; V. 16 हरिणी; V. 17 इन्द्र-

---

1 Read संवत् which is a contraction of संवत्सरे or संवत्सरः.

2 ज्येष्ठ=ज्यैष्ठ०. *Mahārāja* for *Mahārājādhirāja* in an unofficial record is of no importance.

3 Read दुःख-प्रहाणार्त्थम्.

4 See V. 35 below, and *supra*, p. 92, n. 6. The era which became connected with the name of Vikramāditya about the 8th century A.D. was earlier known as the *Kṛita* era or the era of the Mālavas or of the Mālava kings. As regards *Kṛita*, it may be noticed that we have also the spelling *Krita* (=*Krīta*?) in early records. According to Buddhist traditions, Madhyāntika who preached Buddhism in Gandhāra and Kāshmīra, built 500 monasteries, and "he bought foreign slaves to serve the Brethren. Sometime after his decease these inferiors became *rulers of the country*; but neighbouring states despising them as a lowborn breed would not have intercourse with them and called them *Krīta* or 'the Bought'" (Watters, *Yuan Chwang's Travels*, I, p. 265). If it may be believed that the background of

वज्रा ; V. 18 वसन्ततिलका ; V. 19 मालिनी ; V. 20 वसन्ततिलका ; V. 21 आर्य्या ; V. 22 वसन्ततिलका ; V. 23. वंशस्थ ; V. 24 उपेन्द्रवज्रा ; V. 25 वसन्ततिलका ; V. 26 इन्द्रवज्रा ; V. 27 वसन्ततिलका ; V. 28 उपजाति (इन्द्रवज्रा+उपेन्द्रवज्रा) ; V. 29 मन्दाक्रान्ता ; Vv. 30-32 वसन्ततिलका ; V. 33 आर्य्या (defective, with यतिभङ्गदोष); Vv. 34-37 अनुष्टुभ् (श्लोक) ; Vv. 38-39 आर्य्या (with यतिभङ्गदोष in V. 39); V. 40; वसन्ततिलका ; Vv. 41-42 आर्य्या ; V. 43 मालिनी ; V. 44 श्लोक (अनुष्टुभ्).

TEXT[1]

1 [सिद्धम् ॥]

[यो] [त्यर्थ]मुपास्यते सुर-गणै[सिद्धैश्च] सिद्धार्थिभि-

र्द्धानैकाग्र-परैर्विधेय-विषयैर्म्मोक्षार्थिभिर्योगिभिः ।

भक्त्या तीव्र-तपोधनैश्च मुनिभिश्शाप-प्रसाद-क्षमै-

र्हेतुर्य्यो जगत×क्षयाभ्युदययो≍पायात्सवो **भास्करः** ।[।*] **1**[2]

तत्व[3]-ज्ञान-विदो(ऽ*)पि यस्य न विदुर्ब्रह्मर्ष-

2 यो(ऽ*)भ्युद्यता-

×कृत्स्नं यश्च गभस्तिभिः प्रत्रसृतै≍पु[ष्ण]ति लोक-त्रयम् ।

---

the above tradition is the Skytho-Parthian occupation of N.W. India and that some of those foreign kings had originally been slaves like those of the Turkish Slave dynasty of a later period, the name *Krita* (=*Kṛita*; *Kṛita* may be a later emendation) may refer to the foreign origin of the era. That this era and the earlier Skytho-Parthian era are identical is suggested by the date (year 103) of the Takti-Bāhī inscription (*supra*, p. 121f.) of the Parthian king Gondopharnes who was a contemporary of St. Thomas and lived in the first century A.D. according to Christian traditions.

1 From the facsimile in *Corp. Ins. Ind.*, III.

2 उपध्मानीय (old *visarga* before प् and फ्) is indicated by ≍ and जिह्वामूलीय (old *visarga* before क् and ख्) by ×.

3 Usually तत्त्व.

ग[न्ध]र्व्वासुर-सिद्ध-किन्नर-नरैस्संस्तूयते(ऽ*)भ्युत्थितो
भक्तेभ्यश्च ददाति यो(ऽ*)भिलषितं तस्मै सवित्रे नमः ।[।*] 2
यश्च[प्र]ख्यं प्रतिबिभात्युदयाचलेन्द्र-
विस्तीर्ण्ण-तुङ्ग-शिखर-स्खलितांशुजालः [।*]
क्षीबाङ्गना-
जन-कपोल-तलाभिताम्र-
श्चपायात्स वस्सु[कि]रणाभ[रणो] विवस्वान् ।[।*] 3
कुसुमभरानतद्रुवर-देवकुल-सभा-विहार-रमणीयात्[1] ।
लाट-विषयान्नगावृत-शैलाज्जगति प्रथित-शिल्पाः ।[।*] 4
ते देश-पार्थिव-गुणापहृताः प्रकाश-
मद्रादिजान्यविरलान्यसुखा-
न्यपास्य ।
जातादरा दशपुरं[2] प्रथमं मनोभि-
रन्वागतास्ससुत-बन्धु-जनास्समेत्य ॥ 5
मत्तेभ-गण्ड-तट-विच्युत-दान-बिन्दु-
सिक्तोपलाचल-सहस्र-विभूषणायाः[3] [।*]
पुष्पावनम्र-तरु-मण्ड-वतंसकाया
भूमेश्चपरन्तिलक-भूतमिदं क्रमेण ॥ 6
तटोत्थ-वृक्ष-च्युत-
नैक-पुष्प-
विचित्र-तीरान्त-जलानि भान्ति ।
प्रफुल्ल[4]-पद्माभरणानि यत्र
सरांसि कारण्डव-संकुलानि ॥ 7
विलोल-वीची-चलितारविन्द-
पतद्रजः-पिञ्जरितैश्च हंसैः ।

---

1 Read रमणीयात्. Lāṭa was the country to the west of West Mālwā. Navasārikā (mod. Nausāri) was one of its chief cities.

2 Modern Man-Dasor.

3 Read विभूषणायाः.

4 Read प्रफुल्ल. Kāraṇḍava is a kind of duck.

ख-केसरोदार-भरावभुग्नैः
क्वचित्सरांस्यम्बुरुहैश्च भान्ति ।[।*] 8
ख-पुष्प-भारावनतैर्न्नगेन्द्रै-
र्मद-
6 प्रगल्भालि कुल-स्वनैश्च ।
अजस्रगाभिश्च पुराङ्गनाभि-
र्व्वनानि यस्मिन्समलंकृतानि ॥ 9
चलत्पताकान्यबला-सनाथा-
न्यत्यर्थशुक्लान्यधिकोन्नतानि ।
तडिल्लता-चित्र-सिताभ्र-कूट-
तुल्योपमानानि गृहाणि यत्र ॥ 10
कैलास-तुङ्ग-शिखर-प्रतिमानि चान्या-
न्याभान्ति दीर्घ-बलभी-
7 नि सवेदिकानि ।
गान्धर्व्व-शब्द-मुखरानि[1] निविष्ट-चित्र-
कर्म्माणि लोल-कदली-वन-शोभितानि ॥ 11
प्रासाद-मालाभिरलंकृतानि
धरां विदार्य्येव समुत्थितानि ।
विमान-माला-सदृशानि यत्र
गृहाणि पूर्णेन्दु-करामलानि ॥ 12
यद्भात्यभिरम्य-सरिद्वयेन[2] चपलोर्म्मिणा समुपगूढं[3] [।*]
8 रहसि कुच-शालिनीभ्यां प्रीति रतिभ्यां स्मराङ्गमिव ॥ 13
सत्य-[क्षमा]-दम-शम-व्रत-शौच-धैर्य्य-
[स्वाद्धया]य-वृत्त-विनय-स्थिति-बुद्धयुपेतैः ।

---

1 Read मुखराणि·

2 Read सरिद्वयेन·

3 Properly गूढम् ; but in this record and in others the use of the *anusvāra* is found in many such cases.

विद्या-तपो-निधिभिरस्मयितैश्च विप्रै-
र्य्यद्भ्राजते ग्रहगणैरिव खं प्रदीप्तैः ॥ **14**
अथ समेत्य निरन्तर-सङ्गतै-
रहरहः-प्रविजृम्भित-
9 सौहृदाः [।*]
नृपतिभिस्सुतवत्प्रतिम[।]निताः
प्रमुदिता न्यवसन्त सुखं पुरे ॥ **15**
श्रवण-[सु]भग[ं] ध[।]नुर्व्वे[द्यं] दृढं परिनिष्ठिताः
सुचरित-शतासङ्गाःकेचिद्विचित्र-कथाविदः ।
विनय-निभृतास्सम्यग्धर्म्म-प्रसङ्ग-परायणा-
ःप्रियमपरुषं पत्थ्यं चान्ये क्षमा बहु भाषितुं ॥ **16**
10 केचित्स्व-कर्म्मण्यधिकास्तथान्यै-
र्व्विज्ञायते ज्योतिरमात्मवद्भिः[1] ।
[अद्यापि] चान्ये समर-प्रगल्भा-
[ःकु]र्व्वन्त्यरीणामहितं प्रसह्य ।[।*] **17**
प्राज्ञा मनोज्ञ-वधवः प्रथितोरुवंशा
वंशानुरूप-चरिताभरणास्तथान्ये ।
सत्यव्रताः प्रणयिनामुपकार-दक्षा
विस्रम्भ-
11 [पूर्व्व]मपरे दृढ-सौहृदाश्च ॥ **18**
विजित-विषय-सङ्गैर्द्धर्म्म-शीलैस्तथान्यै-
[मृ]दुभि[रधि]क-स[त्वैर्लोकयात्रा]मरैश्च[2] ।
स्व-कुल-तिलक-भूतैर्मुक्तरागैरुदारै-
रधिकमभि[वि]भाति श्रेणिरेवंप्रकारैः ॥ **19**[3]

---

1 Read ज्योतिष°.

2 Usually सत्त्वै°.

3 Note that sections of the people who were originally silk-weavers in the Lāṭa country (=Nausāri-Broach region), when they settled at Daśapura (=Man-Dasor), adopted different professions, such as that of an archer, a story-teller, an exponent of religious problems, an astrologer, a warrior and an ascetic. This shows the looseness of the bond of caste-restrictions at least in western India about the time of this record.

तारुण्य-कान्त्युपचितो(ऽ*)पि सुवर्ण्ण-हार-
तांबूल-पुष्प-विधिना सम-
12 [लंकृ]तो(ऽ*)पि ।
नारी-जनः प्रियमुपैति न तावदग्र्यां[1]
यावन्न पट्टमय-वस्त्र-[यु]गानि धत्ते ॥ **20**
स्पर्श[वता वर्ण्णा]न्तर-विभाग-चित्रे ण नेत्र-सुभगेन [।]
यैस्सकलमिदं क्षितितलमलंकृतं पट्टवस्त्रेण ॥ **21**
विद्याधरी-रुचिर-पल्लव-कर्ण्णपूर-
वातेरिता[स्थि]रतरं प्रविचिन्त्य
13 [लो]कं ।
मानुष्यमर्त्थ-निचयांश्च तथा विशालां-
[स्ते]षां शुभा [म]ति[रभूद]चला ततस्तु[2] [॥] **22**
चतु[स्समुद्रान्त]-विलोल-मेखलां
सुमेरु-कैलास-बृहत्पयोधराम् ।
वनान्त-वान्त-स्फुट-पुष्प-हासिनीं
कुमारगुप्ते प्रिथिवीं [3]प्रशासति ॥ **23**
समान-धीशुक्र-बृहस्पतिभ्यां
ललामभूतो भुवि
(14 पार्त्थिवानां ।
रणेषु यः पार्त्थ-समानकर्म्मा
बभूव गोप्ता नृप-**विश्ववर्म्मा** ॥ **24**
दीनानुकंपन-परः कृपणार्त्त-वर्ग्ग-
सन्ध[ा]प्रदो(ऽ*)धिकदयालुरनाथ-नाथः ।
[क]ल्पद्रुमः प्रणयिनामभयं प्रदश्च
भीतस्य यो जनपदस्य च बन्धुरासीत् ॥ **25**

---

1 Read **तावदश्रयां**. अश्री=secret place.

2 The word **ततस्तु**="and then" is connected with the sentence with **कारितं** (l.16). The intervening verses are by way of a parenthesis. 3 Read **पृथिवीं**

तस्यात्मजः स्थैर्य्य-नयोपपन्नो
ब[न्धु]-प्रियो
15 बन्धुरिव प्रजानां ।
बंध्वर्त्ति-हर्त्ता नृप-**बन्धुवर्म्मा**
द्विड्भूप-पक्ष-क्षपणैक[द]क्षः ॥ **26**
कान्तो युवा रण-पटुर्व्विनयान्वितश्च
राजापि सन्नुपसृतो न मदैः स्मयाद्यैः ।
शृङ्गार-मूर्त्तिरभिभाव्यनलंकृतो(ऽ*)पि
रूपेण यः कुसुम-चाप[1] इव द्वितीयः ॥ **27**
वैधव्य-व्रीव्र-व्यसन-क्षतानां
(16 स्मित्वा[2] यमद्याप्यरि-सुन्दरीणां ।
भयाद्भवत्यायत-लोचनानां
घन-स्तनायास करः प्रकम्पः ॥ **28**
तस्मिन्नेव क्षितिपति-वृषे[3] **बंधुवर्म्म**ण्युदारे
सम्यक्स्फीतं **दशपुर**मिदं पालयत्युन्नतांसे ।
[शि]ल्पावाप्तैर्द्धन-समुदयैः पट्टवा[यैरु]दारं
श्रे[णीभूतै]र्भवनमतुलं कारितं
(17 दीप्त-रश्मेः ॥ **29**
विस्तीर्ण-तुङ्ग-शिखरं शिखरि-प्रकाश-
मभ्युद्गतेन्द्रमल-रश्मि-कलाप-[गौ]रं ।
यद्भाति पश्चिम-पुरस्य निविष्ट-कान्त-
चूडामणि-प्रतिसमन्नयनाभिरामं[4] ॥ **30**

---

1 Fleet's transcript has या

2 Read **स्मृत्वा**. A **म्** was originally engraved after **ण**.

3 Read °**वृषे**.

4 Fleet's transcript has **रमं**. Daśapura is called Paśchimapur, "city of the west," apparently because it was then one of the greatest cities of Western India. Better read **पश्चिमपुरे च**.

रामा-सनाथ-[र*]चने दर-भास्करांशु-
वह्नि-प्रताप-सुभगे जल-लीन-मीने।
चन्द्रांशु-हर्म्यतल-
18 चन्दन-तालवृन्त-
हारोपभोध[1]-रहिते हिम-दग्ध-पद्मे ॥ **31**
रोद्र-प्रियंगुतरु-कुन्दलता-विकोश-
पुष्पा[सव]-प्रमु[दि]तालि-कलाभिरामे।
काले तुषार-कण-कर्कश-शीत-वात-
वेग-प्रनृत्त-लवली-नगणैकशाखे ॥ **32**
स्मर-वशग तरुणजन-वल्लभाङ्गना-विपुल-कान्त-पीनोरु-
19 स्तन-जघन-घनालिङ्गन-निर्भर्त्सित-तुहिन-हिम-पाते ॥ **33**[2]
[मा]लवानां गण-स्थित्या या[ते] शत-चतुष्टये।
त्रिनवत्यधिके(ऽ*)ब्दानाम्रितौ सेव्य-घनस्तने[3] ॥ **34**
सहस्यमास-शुक्लस्य प्रशस्ते(ऽ*)ह्नि त्रयोदशे।
मङ्गलाचार-विधिना प्रासादो(ऽ*)यं निवेशितः ॥ **35**
बहुना समतीतेन
20 कालेनान्यैश्च पार्थिवैः।
व्यशीर्य्यतैकदेशो(ऽ*)स्य भवनस्य ततो(ऽ*)धुना ॥ **36**[4]

---

1 Read भोग.

2 This verse composed of only one compound and several other defective features of the poem show that the author was only a second or third rate poet. The composition which shows more of labour than poetic skill belongs to what is called the Gauḍī rīti by rhetoricians.

3 Read ०मृतौ. Fleet: ०ग्ने. सहस्य=पौष and शुक्ल=शुक्लपक्ष

4 Here the period of about 36 years has been mentioned as "a long time". Fleet translates, "under other kings, part of the temple fell into disrepair". The language however seems to support Mr. D. Sharma who wants to translate, "a part of this building was destroyed (damaged?) by other kings" and thinks of the occupation of Central India by the Hūṇas (*Ind. Cult.*, III, p. 379ff.; IV, p. 262f.). In that case Bandhuvarman died long before A.D. 473. But the passage may refer to an attack on Daśapura by hostile kings (long after A.D. 436) and not to the permanent occupation of the kingdom by them. If this interpretation be accepted, the Mālwā king was alive in A. D. 473.

स्वयशो-[विद्धये[1] सर्व्वमत्युदा]रमुदारया ।
संस्कारितमिदं भूयः [श्रेयया] भानुमतो गृहं ॥ 37
अत्युन्नतमवदातं नभ(:*)-स्पृशन्निव[2] मनोहरैश्शिखरैः ।
शशि-भान्वोरभ्युदयेष्वमल-मयूखायतन-
21 भूतं ॥ 38
वत्सर-शतेषु पंचसु विंशत्यधिकेषु[3] नवसु चाब्देषु ।
यातेष्वभिरम्य-[तप]स्यमास-शुक्ल-द्वितीयायां ॥ 39
स्पष्टैरशोकतरु-केतक-सिंदुवार-
लोलातिमुक्तकलता-मदयंतिकानां ।
पुष्पोद्गमैरभिनवैरधिगम्य नून-
मैक्यं विजृंभित-शरे हर-पूत-देहे[4] ॥ 40
22 मधुपान-मुदित-मधुकर-कुलोपगीत-नगनैक-पृथु-शाखे ।[5]
काले नव-कुसुमोद्गम-दंतुर-कांत-प्रचुर-रोद्धे ॥ 41
शशिनेव नभो विमलं कौ[स्तु]भ-मणिनेव शार्ङ्गिणो वक्षः ।
भवन-वरेण तथेदं पुरमखिलमलंकृतमुदारं ॥ 42
अमलिन-शशि-)

But the name of the reigning overlord of the Mālwā king (who apparently began to rule as a vassal of Kumāra Gupta I, 414-55 A.D.) in the Mālava year 529=A.D. 473 is not mentioned. This may refer to the fact that about 473 A.D. a struggle for the Gupta imperial throne was going on and the author avoided the mention of the name of the reigning Gupta emperor owing to the confusion caused by it. Note that in the Belkharā inscription a feudatory of the Kanauj empire similarly avoids the mention of his overlord. Palaeographically the record belongs to the later half of the 5th century. Suggestions of some recent writers that the record belongs to the 10th century is utterly absurd.

1 Read वृद्धये.

2 स्पृशन् (masc.) does not suit गृहं (neut.). Fleet suggests the correction नभः स्पृशतीव which however does not suit the text quite well. Fleet: मनोहरैः शि०

3 Read विंशत्य०. तपस्य=फाल्गुन

4 Fleet suggests the correction धृत ; the word means Madana. Fleet: मदयन्तिकानां.

5 Read नगगैक.

23 लेखा-दंतुरं पिङ्गलानां
परिवहति समूहं यावदीशो जटानां ।
वि[कच-क]मल-मालामंस-सक्तां[1] च शार्ङ्गीं
भवनमिदमुदारं शाश्वतन्तावदस्तु ॥ **43**
श्रेण्यादेशेन भक्त्या च कारितं भवनं रवेः ।
पूर्व्वा[2] चेयं प्रयत्नेन रचिता **वत्सभट्टिना** ॥ **44**
24 स्वस्ति कर्तृ-लेखक-वाचक-श्रोतृभ्यः ॥ सिद्धिरस्तु ॥

No. 22—Inscription on the Aśvamedha Type of Coins of Kumāra Gupta I (A.D. 414-55)

ALLAN, *Catalogue*, p. 68 ff.

First Side[3]

Horse standing to right, wearing breast-band and saddle, before *yūpa* on alter, the pennons from which fly over its back ; between the legs of the horse, inscription in the Sanskrit language and Brāhmī characters of the northern class :—

श्वमध (= अश्वमेधः or अश्वमेधाश्वः)[4]

Second Side

Mahishī Anantadevī standing to left, nimbate, holding chowrie over right shoulder and some object in left hand, wearing ear-rings, necklace, armlets and anklets ; sacrificial spear bound with fillets on left ; border of dots ; inscription in Brāhmī characters :—

[श्री]-अश्व[मे]ध-महेन्द्र [:*][5]

---

1 Fleet: विकट 2 We may supply प्रशस्तिः after चेयं. पूर्व्वा=the above.

3 From representation in Allan's Catalogue, Plate XII, No. 14; see also No. 13.

4 On one specimen we have जयत दव कुमर (=जयति दिवं कुमारगुप्तोऽयं ; Metre: उपगीति). 5 Properly, श्रयश्वमेध०.

No. 23—Inscription on some Silver Coins of Kumāra Gupta I—Gupta year 124 (=443-44 A. D.)

ALLAN, *Catalogue*, p. 107 ff.; No. 385 ff.

First Side[1]

Head of king to right as on the silver issues of Chandra Gupta II; on right :—[१००*] (+*) २० (+*) ४ (=गुप्तवर्षे १२४)[2]

Second Side

Peacock[3] standing, facing, with head to left ; wings and tail outspread; border of dots; legend in Bramī characters of the northern class :—[विजितावनिरव*]नि-पति[:*] कुमारगुप्तो दिवं ज[यति*][4]

No. 24—Tumain Fragmentary Inscription of Ghaṭotkacha Gupta—Gupta year 116 (=435-36 A.D.)[5]

TUMAIN, Esāgarh Dist., Gwalior State.

M. B. Garde, *Ind. Ant.*, XLIX (1920), pp. 114-15; BHANDARKAR, List, No. 1269.

Abstract of Contents.

It refers to Chandra Gupta II who conquered the earth as far as

---

1 From representation in Allan's *Catalogue*, plate XVII, Nos. 11ff. This type is supposed to have been issued in the Ganges valley. The West India issues have a Garuḍa on the reverse. Kumāra Gupta's viceroy in Mālwā was his brother Mahārāja Govinda Gupta who is known from a Basārh clay seal and from a Mandasor record of the Mālava year 524 (=467 A.D.) of Dattabhaṭa, son of Govinda Gupta's general Vāyurakshita.

2 Other specimens of this variety have the dates 118, 119 and 122 of the Gupta era, corresponding respectively to A.D. 437-38, 438-39 and 441-42.

3 The peacock reminds us of the Peacock Type of the gold coins of Kumāra Gupta I, having on obverse king feeding peacock from bunch of fruit and on reverse god Kārttikeya riding on his peacock called Paravāṇi by some authorities. Kārttikeya and his emblem the peacock on these coins apparently refer to the king's name *Kumāra* which indicates that god.

4 Metre : उपगीति. The *anusvāra* and vowel-marks are not found on the plate.

5 No text or facsimile of the record has been published.

the ocean, to his son Kumāra Gupta I, and to Ghaṭotkacha Gupta[1] who won by the prowess of his arms the good fame attained by his ancestors. The date of the record is *Year 116* of the era of the [Gupta] sovereigns when Kumāra Gupta I was ruling the earth. It refers to the construction of a temple by several persons who were brothers and were residents of Tumbavana (=Tumain).

(Line 4) [गुप्तान्वया*]नां वसुधेश्वराणां
समा-शते षोडशवर्ष-युक्ते [1*]
कुमारगुप्ते नृपतौ पृथिव्यां
विराजमाने शरदीव सूर्य्ये ॥ (Metre : उपजाति [इन्द्रवज्रा+उपेन्द्रवज्रा])

No. 25—Junāgaṛh Rock Inscription of Skanda Gupta—Gupta years 136, 137 and 138 (=455, 456 and 457-58 A.D.)

JUNĀGARH, Junāgaṛh State, Kaṭhiāwāṛ

FLEET, *Corp. Ins. Ins.*, III, p. 58 ff; BHANDARKAR, List, No. 1276 (for other references).

Language: Sanskrit.

Script: Brāhmī of the Southern class.

Metre: Verses 1-3 मालिनी ; V. 4 आर्य्या ; V. 5 उपजाति (इन्द्रवज्रा+उपेन्द्रवज्रा) ; Vv. 6-12 इन्द्रवज्रा ; Vv. 13-15 उपजाति (इन्द्रवज्रा + उपेन्द्रवज्रा); V. 16 अर्द्धसम-मालभारिणी

1 This Gupta prince, probably a son of Kumāra Gupta I and his viceroy in the eastern part of Central India (?) should be identified with the person issuing (1) the seal found at Basāṛh bearing the inscription श्रीघटोत्कचगुप्तस्य (*Arch. Surv. Ind.*, A.R., 1903-04, pp. 102, 107) and (2) the coin in the St. Petersburg collection which bears on the obverse beneath the king's arm the word घटो॰ and a marginal legend ending in गुप्तः (=॰त्कचगुप्तः), and on the reverse the legend क्रमादित्यः (?) (See Allan, Catalogue, p. 149, Pl. XXIV, No. 3, Intro. p. liv). It is not impossible that he was one of the rivals who contended for the throne with Skanda Gupta. Note that the name of Samudra Gupta's grandfather was Ghaṭotkacha and not Ghaṭotkacha Gupta.

or वैतालीय-औपच्छन्दसिक ; Vv. 17-20 उपजाति (इन्द्रवज्रा +उपेन्द्रवज्रा) ; Vv. 21-25 इन्द्रवज्रा ; V. 26 वंशस्थ ; V. 27 इन्द्रवज्रा ; Vv. 28-31 वंशस्थ ; Vv. 32-37 उपजाति (इन्द्रवज्रा+ उपेन्द्रवज्रा); Vv. 38-39 मालिनी ; V. 40 उपजाति (वंशस्थ+ इन्द्रवंशा ; Fleet wrongly takes it to be वंशस्थ defective in the first syllable of the first and third *pādas*); Vv. 41-42 इन्द्रवज्रा ; Vv. 43-44 वसन्ततिलका ; V. 45 आर्य्या (?) ; Vv 46-47 वसन्ततिलका.

TEXT[1]

Part I

1 सिद्धम् ॥

श्रियमभिमतभोग्यां नैककालापनीतां

त्रिदशपति-सुखार्थं यो बलेराजहार ।

कमल-निलयनायाः शाश्वतं धाम लक्ष्म्याः

2 स जयति विजितारिर्विष्णुरत्यन्त-जिष्णुः ॥ **1**

तदनु जयति शश्वत् श्री-परिक्षिप्त-वक्षाः[2]

स्वभुज-जनित-वीर्यो राजराजाधिराजः ।

नरपति-

3 भुजगानां मानदर्पोत्फणानां

प्रतिकृति-गरुडा[ज्ञां] निर्व्विषो[ऽ] चावकर्त्ता ॥ **2**[3]

---

1 From the facsimile in *Corp. Ins. Ind.*, III. For the early history of the Sudarśana lake, see *supra*, Bk. II, No. 67. The lake was made exclusively to help cultivation in the Junāgarh region. Its history speaks eloquently of the beneficent activities of ancient Indian kings.

2 Read शश्वच्छ्री॰

3 Fleet translates, "who plucked (and utilised) the authority of (his local) representatives who were so many Garuḍas, and used it as antidote against the (hostile) kings who were so many serpents." But प्रतिकृतिगरुडाज्ञा may mean 'command conveyed through the Garuḍa in its representation," i.e., a command under the Garuḍa seal of the Gupta king. निर्व्विषी is a kind of grass used as an antidote against all sorts of poison.

नृपति-गुण-निकेतः **स्कन्दगुप्तः** पृथु-श्रीः[1]
चतुरु[दधि जल]ान्तां स्फीत-पर्यन्त-देशाम् ।
अवनिमवनतारिर्यः चकारात्म-संस्थां
पितरि सुरसखित्वं प्राप्तवत्यात्म-शक्त्या ॥ **3**[2]
अपि[3] च जित[मे]व तेन प्रथयन्ति यशांसि यस्य रिपवो(ऽ*)पि [।*]
आमूल-भग्न-दर्पा नि[र्वचना][4] [म्लेच्छ-देशेषु] ॥ **4**
क्रमेण बुद्धया निपुणं प्रधार्य
ध्यात्वा च कृत्स्नान्गुण-दोष-हेतून् ।
व्यपेक्ष्य सर्व्वान्मनुजेन्द्र-पुत्रां-
श्चक्रमीः स्वयं यं वरयांचकार ॥ **5**[5]
तस्मिन्नृपे शासति नैव कश्चि-
द्धर्म्मादपेतो मनुजः प्रजासु ।
आर्त्तो दरिद्रो व्यसनी कदर्यो
दण्ड[6] न वा यो भृश-पीडितः स्यात् ॥ **6**
एवं स जित्वा पृथिवीं समग्रां
भग्नाग्र-दर्पा[न्] द्विषतश्च कृत्वा ।
सर्व्वेषु देशेषु विधाय गोप्तॄन्[7]
संचिन्तया[मा]स बहु-प्रकारम् ॥ **7**
स्यात्को(ऽ*)नुरूपो

---

1 Read ०श्रीश्चतु०

2 Cf. v. 6 of *infra*, No. 28.

3 Fleet's transcript has **आपि**. Practically, "**जितमेव तेन**" इति.

4 This is Fleet's conjectural reading. Mlechchha may indicate the Hūṇas who may have advanced against Central India about the end of Kumāra Gupta's reign.

5 **मनुजेन्द्र-पुत्र** may simply indicate "princes"; but it may also refer to other Gupta princes who might have struggled with Skanda Gupta for the imperial throne after Kumāra Gupta's death. See *supra*, p. 299, n. 1 and *infra*, p. 320, n.1.

6 Read **दण्ड्यो**.

7 Read **गोप्तॄन्**. **गोप्ता**=governor. Skanda Gupta's deliberation over the appointment of a governor of the westernmost Gupta province may have been due to the Hūṇa menace in Central India. Cf. *infra*, v. 12.

7 मतिमान्विनितो[1]
मेधा-स्मृतिभ्यामनपेत-भावः ।
सत्यार्जवौदार्य-नयोपपन्नो
माधुर्य-दाक्षिण्य-यशोन्वितश्च ॥ 8
भक्तो(ऽ*)नुरक्तो नृ-[विशे]ष-युक्तः
सर्व्वोपधाभिश्च विशुद्ध-बुद्धिः ।
अनृण्य-भावोपगतान्तरात्माः[2]
सर्व्वस्य लोकस्य हिते प्रवृत्तः ॥ 9
8 न्यायार्जने(ऽ*)र्थस्य च कः समर्थः
स्यादर्जितस्याप्यथ रक्षणे च ।
गोपायितस्यापि [च] वृद्धि-हेतौ
वृद्धस्य पात्र-प्रतिपादनाय ॥ 10
सर्व्वेषु भृत्येष्वपि संहतेषु
यो मे प्रशिष्यान्निखिलान्**सुराष्ट्रान्**।
आं ज्ञातमेकः खलु **पर्णदत्तो**
भारस्य तस्योद्वहने समर्थः ॥ 11
9 एवं विनिश्चित्य नृपाधिपेन
नैकानहो-रात्र-गणान्त्स-मत्या ।
यः संनियुक्तो(ऽ*)र्थनया कथंचित्
सम्यक्**सुराष्ट्रा**वनि-पालनाय ॥ 12
नियुज्य देवा वरुणं प्रतीच्यां
स्वस्था यथा नोन्मनसो बभूवु[ः] [।*]
पूर्व्वेतरस्यां दिशि **पर्णदत्तं**
नियुज्य राजा धृतिमांस्तथाभूत् ।[।*] 13
10 तस्यात्मजो ह्यात्मज-भाव-युक्तो
द्विधेव चात्मात्म-वशेन नीतः ।

